वैयाकरणसिद्धान्तकौमुदी

कारकप्रकरणम् (१२)

२४.०६.२०१३

पुनरावर्तनम्

- कारकद्वितीया
  - कर्मसंज्ञा
  - अनभिहिताधिकारः
  - कर्मणि द्वितीया
- अनभिहिताधिकारः
  - सर्वाणि विभक्तिविधायकानि सूत्राणि अभिव्याप्नोति ।
  - अभिधानं प्रायेण तिङ्-कृत्-तद्धित-समासैः, क्वचित् निपातेन
  - विभक्त्यर्थे अभिहिते सति प्रातिपदिकार्थे प्रथमाविभक्तिः भवति।

पुनरावर्तनम्

- कर्मकारकम्
  - कर्तुरीप्सिततमं कर्म (१.४.४९)
  - तथायुक्तं चानीप्सितम् (१.४.५०)
  - अकथितं च (१.४.५१)
  - गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ (१.४.५२)
  - हृक्रोरन्यतरस्याम् (१.४.५३)
  - अधिशीङ्स्थासां कर्म (१.४.४६)
  - अभिनिविशश्च (१.४.४७)
  - उपान्वध्याङ्वसः (१.४.४८)

उपपदद्वितीया

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ (वा)

- उभसर्वतसोः, धिक्, उपर्यादिषु त्रिषु आम्रेडितान्तेषु द्वितीया कार्या । ततः अन्यत्रापि दृश्यते ।
- उभयतः, सर्वतः - इति अव्यये ।
- 'उपर्यध्यधसः सामीप्ये' (८.२.७) इति सूत्रेण उपरि, अधि, अधः इत्येतेषां त्रयाणां सामीप्येऽर्थे द्वित्वं विधीयते । उपर्युपरि, अध्यधि, अधोऽधः ।
- 'तस्य परमाम्रेडितम्' (८.२.२.) इति द्विरुक्तस्य परं रूपम् आम्रेडितसंज्ञं स्यात् इत्युच्यते ।
- आम्रेडितान्तानाम् एषां त्रयाणां योगे द्वितीया भवेत् इति वार्तिकार्थः ।
- उभसर्वतसोरिति ।

- उभयतः कृष्णं गोपाः ।
- सर्वतः कृष्णम् (गोपाः) ।
- धिक् कृष्णाभक्तम् ।
- उपर्युपरि लोकं हरिः ।
- अध्यधि लोकम् ।
- अधोऽधो लोकम् ।
- उभयतः कृष्णं गोपा इत्यादि ।

अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि (वा)

- अभितःपरित इति ।
- अभितः कृष्णम् ।
- परितः कृष्णम् ।
- ग्रामं समया ।
- निकषा लङ्काम् ।
- हा कृष्णाभक्तम् । तस्य शोच्यत इत्यर्थः ।
- बुभुक्षितं न प्रतिभाति किञ्चित् ।
- अभितः कृष्णमित्यादि ।

अन्तराऽन्तरेण युक्ते (२.३.४)

- पदद्वयम् । अन्तरा-अन्तरेण, युक्ते ।
- कर्मणि द्वितीया (२.३.२) इत्यतः 'द्वितीया' इति अनुवर्तते ।
- आभ्यां योगे द्वितीया स्यात् ।
- अन्तरान्तरेण युक्ते ।
- अन्तरा त्वां मां हरिः ।
- अन्तरा त्वां मां हरिरिति ।
- अन्तरेण हरिं न सुखम् ।
- अन्तरेण हरिमिति ।

कर्मप्रवचनीयाः (१.४.८३)

- एकपदात्मकं सूत्रम् ।
- इत्यधिकृत्य ।
- संज्ञाधिकारोऽयम् ।
- ‘अधिरीश्वरे’ (१.४.९७) इति सूत्रपर्यन्तम् अधिकारः ।

अनुर्लक्षणे (१.४.८४)

- पदद्वयम् । अनुः, लक्षणे ।
- ‘कर्मप्रवचनीयाः’ (१.४.८३) इति अधिक्रियते ।
- लक्षणे द्योत्ये अनुः उक्तसंज्ञः स्यात् ।
- उक्तसंज्ञ इति ।

- गत्युपसर्गसंज्ञापवादः ।
- ‘उपसर्गाः क्रियायोगे’, ‘गतिश्च’ इति सूत्राभ्यां प्रादीनाम् उपसर्गसंज्ञा, गतिसंज्ञा च दीयते । तत्प्रयुक्तानि कार्याणि विशिष्टानि भवन्ति ।
- एतत्संज्ञाद्वयं बाधित्वा कर्मप्रवचनीयसंज्ञा भवति । अस्याः संज्ञायाः प्रयोजनद्वयम् -

1. द्वितीयादिविभक्तिप्राप्तिः
2. उपसर्ग-गति-प्रयुक्तानां कार्याणां निवारणम् ।

- गत्युपसर्गसंज्ञापवाद इति ।

कर्मप्रवचनीययुक्ते द्वितीया (२.३.८)

- पदद्वयम् । कर्मप्रवचनीययुक्ते, द्वितीया ।
- एतेन योगे द्वितीया स्यात् ।
- पर्जन्यः जपम् अनु प्रावर्षत् ।
- पर्जन्यो जपमन्विति ।
- हेतुभूतजपोपलक्षितं वर्षणम् इत्यर्थः ।
- हेतुभूतेति ।

- परापि हेतौ तृतीया अनेन बाध्यते । (‘हेतौ’ २.३.२३) ।
- ‘लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः’ (१.४.९०) इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात् ।
- पुनस्संज्ञेति ।